स्नानानि “स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः। तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं स्मृतम्। नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम्। क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्त्तितम्” व्यासोक्तेः तत्र नित्यादीन्यनुपदं वक्ष्यन्ते। “असामर्थ्याच्छरीरस्य देशकालाद्यपेक्षया। मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः जा० स्मृ०। “गृहेऽपि च द्विजातीनां मन्त्रवत् स्नानमिष्यते। विधिलोपं न ते कुर्य्युः सामर्थ्ये सति कर्म्मसु” जैमि०स्मृ० “अल्पत्वाद्धोमकालस्य बहुत्वात् स्नानकर्म्मणः प्रातर्न तनुयात् स्नानं होमलोपोविगर्हितः” कात्या०स्मृ०। “प्रातः संक्षेपतः स्नानं शौचार्थं तु तदिष्यते। मन्त्रैस्तु विधिनिष्पाद्यं मध्याह्ने तु सविस्तरम्” वशि०। अत्यन्ताशक्तौ। “अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्म्मिणाम्। आर्द्रेण वाससा वापि मार्जनं कापिलं विदुः। कृताभिमन्त्रितैस्तोयैः प्रोक्षयेन्मूर्द्ध्नि सर्व्वतः। अनुकल्पमिदं स्नानं सर्व्वपापहरं नृणाम्” जावा०स्मृ०। एकवाससाऽपि स्नानं कर्त्तुं शक्यते “एकेन वाससा स्नायाद्द्वाभ्यामनियमः स्मृतः। बहुवासोनिषेधश्च स्नाने फलमभीप्सतः” विष्णूक्तेः नैकवासाः क्रियां कुर्य्यात् स्नानं कर्म्म विना क्वचित्” तदुक्तेश्च “अस्पृश्यस्पर्शने चैव वार्त्तायां पुत्रजन्मनि। एतद्द्विवाससा कार्य्यमन्यत्रैकेन वाससा” वसि० “न नग्नोनान्यदीयेन नार्द्रेण न सूच्या ग्रथितेन न विकृतेन च स्नायात्” इत्याचारतिलकः। तत्र नित्यं प्रातःस्नानम्, “प्रातः समाचरेत् स्नानं तच्च नित्यमिति स्मृतम्” मार्क०पु०। चन्द्रसूर्य्योपरागे अशौचादौ अस्पृश्यस्पर्शने च स्नानं नैमित्तिकम्। “पुष्येऽर्के जन्मनक्षत्रे व्यतीपाते च वैधृतौ। अमायाञ्च नदीस्नानं पुनात्या सप्तमात् कुलम्” इत्याद्युक्तं स्नानं काम्यम्। धर्म्मकर्म्म कर्त्तुं यत् पूर्व्वस्नानं तत्क्रियाङ्गम्। “मलापकर्षणं नाम स्नानमभ्यङ्गपूर्व्वकम्। मलापकर्षणायैव तत्प्रवृत्तिस्तु नान्यथा।” तत्र स्नानविधिश्च आश्व०गृ०परि०उक्तः यथा।

“अथ स्नानविधिस्तत्प्रातर्मध्याह्ने च गृहस्थः कुर्य्यादेकतरत्र वा प्रातरेव, ब्रह्मचारी यतिस्त्रिषु सवनेषु द्विः त्रिर्वा वानप्रस्थः। तत् प्रातः सहगोमयेन कुर्य्यान् मृदा मध्यन्दिने सायं शुद्धाभिरद्भिः। न प्रातःस्नानात् प्राक्सन्ध्यामुपासीत प्रातरुत्सृष्टं गोमयमन्तरिक्षस्थं सङ्गृह्य भूमिष्ठं वीपर्य्यधस्य संत्यक्तं तीर्थमेत्य धौतपादपाणिमुख आचम्य सन्ध्योक्तवदात्माभ्युक्षणादि च कृत्वा द्विराचम्य दर्भपाणिः संयतप्राणः कर्म सङ्कल्प्य गोमयं वीक्षितमादाय सव्ये पाणौ कृत्वा व्याहृतिभिस्त्रेधा विभज्य दक्षिणं भागं प्रणवेन दिक्षु विक्षिप्योत्तरं तीर्थे क्षिप्त्वा मध्यमं “मानस्तोक” इत्यृचाभिमन्त्र्य “गन्धद्वाराम्” इत्यनया मूर्द्धादिसर्वाङ्गमालिप्य प्राञ्जलिः “वरुणं हिरण्यशृङ्गमिति” द्वाभ्याम् “अव ते हेड” इति द्वाभ्यां “प्रसम्राजे बृहदु चेति” सूक्तेन प्रार्थ्य “हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः। यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्। तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः” इत्यथ “याः प्रवतो निवत उद्वत” इत्येतया तीर्थमभिमृश्यावगाह्य स्नातो द्विराचम्य मार्जयेत् अम्बयोयन्त्यध्वभिः” इत्यष्टाभिः “आपो-हिष्ठेति” च नवभिरथ तीर्थमङ्गुष्ठेन” “इमं मे गङ्गे” इत्यृचा त्रिःप्रदक्षिणमालोड्य प्रकाशपृष्ठमग्नौ अघमर्षणसूक्तं त्रिरावर्त्य निमज्योन्मज्यादित्यमालोक्य द्वादशकृत्व आप्लुत्य पाणिभ्यां शङ्खमुद्रया योनिमुद्रया वोदकमादाय मूर्ध्नि मुखे बाह्वोरुरसि चात्मानङ्गायत्र्याभिषिच्य “त्वन्नो अग्ने वरुणस्य विद्वानिति” द्वाभ्यात् “तरत्समन्दीधावतीति” च सूक्तेन पुनः स्नायान्मूर्ध्नि चाभिषिञ्चेत् “तद्विष्णोः परमम्पदम्” “अग्ने रक्षाणो अंहसो यत्किञ्चेदं वरुणदैव्ये जने” इत्येता जपेत्, स्रोतोऽभिमुखः सरित्सु स्नायादन्यत्रादित्याभिमुखोऽथ साक्षताभिरद्भिः प्राङ्मुख उपवीती दैवतीर्थेन व्याहृतिभिर्व्यस्तसमस्ताभिर्ब्रह्मादीन्देवान् सकृत्सकृत्तर्पयित्वाथोदङ्मुखः निवीती सयवाभिरद्भिः प्राजापत्येन तीर्थेन कृष्णद्वैपायनादीन् ऋषींस्ताभिर्व्याहृतिभिर्व्यस्ताभिस्तर्पयित्वाथ दक्षिणाभिमुखः प्राचीनावीती पितृतीर्थेन सतिलमद्भिर्व्याहृतिभिरेव सोमः पितृमान् यमो अङ्गिरस्वानग्निष्वात्ताः कव्यवाहन इत्यादीं स्त्रींस्त्रींस्तर्पयेदेतत्स्नानाङ्गतर्पणमथ तीरमेत्य दक्षिणाभिमुखः प्राचीनावीती “ये के चास्मत्कुले जाता अपुत्रागोत्रिणो मृताः। ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकमिति वस्त्रं निष्पीड्य यज्ञोपवीत्यप उपस्पृश्य परिधानीयमभ्युक्ष्य परिधाय द्वितीयञ्चोत्तरीयं पर्य्युक्षितं प्रावृत्य द्विराचामेद्यथोक्तसन्ध्यामुपासीतेदं प्रातःस्नानविधानम्।

अथ मध्यन्दिने तीर्थमेत्य धौतपाणिपादमुखो द्विराचम्यायतप्राणः स्नानं सङ्कल्प्य दर्भपवित्रपाणिः शुचौ देशे खनित्रेण भूमिङ्गायत्र्यस्त्रेण खात्वोपरिष्टदष्टचतुरङ्गुलमुद्धाय तस्यास्तान्मृदं तथा खात्वा गायत्र्यादाय गर्त्तमुद्वासितया